# आदर्श–प्रश्नपत्रम्
# द्वादशी परीक्षा–2012–13
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् पूर्णाङ्कः 100

निर्देश :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचित विकल्पं चित्वा लिखत– 7

(क) त्रुभवनम् इत्यस्मिन् पदे समासः अस्ति–

(अ) द्वन्द्वः (ब) कर्मधारयः

(स) द्विगुः (द) तत्पुरूषः

(ख) 'गुरोः+आदेशः' इत्यस्य सन्धिः अस्ति–

(अ) गुरुआदेशः (ब) गुरोदशः

(स) गुरारादेशः (द) गुरोपदेशः

(ग) 'सज्जनः' इत्यत्र सन्धि अस्ति–

(अ) यण्सन्धिः (ब) गुणसन्धिः

(स) विसर्गसन्धिः (द) व्यंजनसन्धिः

(घ) ''सुबन्तः' इत्यस्य सन्धिविच्छेदः भवति–

(अ) सुब्+अन्तः (ब) सुप्+अन्तः

(स) सुप+अन्तः (द) सु+अन्तः

(ड.) 'महात्मा' इत्यस्य पदस्य समासविग्रहः अस्ति–

(अ) महान् चासौ आत्मा (ब) महान् आत्मा

(स) महा च असौ आत्मा (द) महा आत्मा

(च) अधोलिखितेषु अव्ययीभावसमासस्य उदाहरणं नास्ति–

(अ) उपगड्.गम् (ब) निर्मक्षिकम्

(स) यथाशक्ति (द) प्रजापतिः

(छ) अधोलिखितेषु द्वन्द्व समासस्य उदाहरणं अस्ति–

(अ) चतुर्यगम् (ब) अष्टाध्यायी

(स) नियमसंयमौ (द) चौरभयम्

2. उचितविकल्पं चित्वा लिखत– 4

(क) अधोलिखितेषु अव्ययम् नास्ति–

(अ) रम् (ब) अत्र

(स) अव (द) प्र

(ख) अधोलिखितेषु अव्ययं अस्ति–

(अ) ह्यः (ब) लेभे

(स) शरदः (द) सर्वम्

(ग) बालिका अद्य गीतं गास्यति–

(अ) गीतं (ब) अद्य

(स) गास्यति (द) बालिका

(घ) 'उपहारः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(अ) उत् (ब) उ

(स) हारः (द) उप

प्र.3 उचितविकल्पं चित्वा लिखत– 3

(क) 'आसीत्' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) द्विवचनम् (ब) बहुवचनम्

(स) एकवचनम् (द) कोऽपि नास्ति

(ख) 'स्यात्' इत्यस्मिन् पदे लकारः अस्ति–

(अ) लोट् लकारः (ब) लट् लकारः

(स) लृट्लकारः (द) विधिलिङ्. लकारः

(ग) अधोलिखितेषु लट्लकारस्य उदाहरणं नास्ति–

(अ) क्रुध्यति (ब) आप्नोति

(स) ज्ञास्यति (द) जानाति

प्र.4 उचितं विकल्पं चित्वा लिखत– 4

क. 'क्तवतु' प्रत्ययस्य उदाहरणम् अस्ति–

(अ) गत्वा (ब) गतः

(स) आगत्य (द) गतवान्

ख. 'बुद्धिमान' इत्यस्मिन् पदे प्रत्ययः–

(अ) तरप् (ब) मतुप्

(स) मयट् (द) इष्ठन्

ग. 'दर्शकः' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) तव्यत् (ब) णवुल

(स) तृच् (द) णिनि

घ. अधोलिखितेषु 'टाप' प्रत्ययस्य उदाहरणम् नास्ति–

(अ) अजा (ब) बाला

(स) शाला (द) कोकिला

प्र.5 उचित विकल्पं चित्वा लिखत– 5

क 'वनम्' इत्यस्य पयार्यशब्दः अस्ति–

(अ) कुलम् (ब) अलम्

(स) फलम् (द) अरण्यम्

ख. 'अधः' इत्यस्य विलोमशब्दः अस्ति–

(अ) उपरि (ब) ततः

(स) इतः (द) नीचः

ग. 'यशः' इत्यस्य पर्यायवाचीशब्दः अस्ति–

(अ) कीर्तिः (ब) अपयशः

(स) श्रीः (द) धियः

घ. पण्डितोऽपि वरं शत्रुः न ––––––––।

(अ) मुर्खो (ब) धियः

ड. ––––––––––– केवलमीश्वरेच्छा।

(अ) गरीयसी (ब) बलीयसी

प्र.6 उचितविकल्पं चित्वा लिखत– 3

क. 'मनसि' इत्यस्मिन् पदे विभक्तिः अस्ति–

(अ) तृतीया (ब) चतुर्थी (स) सप्तमी (द) द्वितीया

ख. 'आत्मानम्' इत्यस्मिन् पदे विभक्तिः अस्ति–

(अ) प्रथमा (ब) द्वितीया

(स) पंचमी (द) षष्ठी

ग 'विद्वांसः' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) द्विवचनम् (ब) बहुवचनम्

(स) एकवचनम्

प्र.7 युग्म–मेलनम् कुरुत– 4

| | क | ख |
|---|---|---|
| अ) | वसन्ते लसन्तीह | अपर्णे |
| ब) | प्रकीर्णाः | दुग्धजलभेदविधौ |
| स) | हंसस्य | सरला रसालाः |
| द) | बालमृगाक्षि | बालुकाः |

प्र.8 अधोलिखितेषु चतुर्णां प्रश्नानाम् उत्तराणि एकपदेन लिखत– 4

क) प्रथमे वयसि कौ सेवनीयौ ?

ख) सोभशर्मणा कति विद्याः अधीताः ?

ग) कस्याः नाम अपर्णा ?

घ) द्रौपदी कस्य नृपस्य आत्मजा अस्ति ?

ड.) सर्वविदां समाजे किं भूषणम् ?

प्र.9 अधोलिखितेषु त्रयाणां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत– 6

क) अजयस्य कोपः किमर्थम् आगतः ?

ख) के पराभवं ब्रजन्ति ?

ग) जनसम्मर्दः कुत्र आसीत् ?

घ) किं नाम सतीत्वम् ?

ड.) शकुन्तलायाः आभरणानि कस्मादागतानि ?

प्र.10 अधोलिखितेषु पंच अशुद्धकारकवाक्यानां शुद्धिः करणीया– 5

क) सरस्वतीं नमः।

ख) ग्रामस्य उभयतः वृक्षाः सन्ति।

ग) बालकः मित्रस्य सह क्रीडति।

घ) अलं कोलाहले।

ड.) छात्राः विद्यालयस्य प्रति गच्छन्ति।

च) अग्निं स्वाहा।

प्र.11 अधोलिखितेषु एकस्य कवेः सड.क्षिप्तपरिचयं लिखत। 4

(अ) पण्डितराजगन्नाथंः

(ब) महाकविभारविः

(स) वेदव्यासः

प्र.12 प्रदतैः शब्दैः अनुच्छेदलेखनं करुत– 4

(श्रुत्वा, सिद्धार्थस्य, शरीरात्, हंसं, देहि, निपातितः, उपवनं, हंसः)

एकदा राजकुमारः सिद्धार्थः विहरार्थ–––––––– गतः। सहसा क्रन्दनध्वनिं –––––––– सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः––––––––––भूमौ पतितः आसीत्। एतद् दृष्ट्वा –––––––– चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य––––––– बाणं निष्कास्य तम् अड्.के अधारयत्। अत्रान्तरे धावन् ––––––– दृष्ट्वा सः उच्चैः अवदत्–सिद्धार्थ ! एषः हंसः मया बाणेन –––––––। अतः मह्यं–––––––।

13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत– 4

14 प्रदत्तैः शब्दैः चतुर्णां वाक्यानां रिक्तस्थानपूर्तिं कुरुत– 4

(सुधासौन्दर्यं, कारणात्, केदाराः व्यापादनीया, मक्षिकापातः)

(क) ताटका त्वया––––––––।

(ख) ––––––– ते सलिलमशिवं नः शमयतु।

(ग) इन्द्रियाणां तृप्तिर्नास्ति कस्मात्–––––––।

(घ) प्रथमकवल एव ––––––––––।

(ड.) कादम्बरी गद्यबन्धा इव दृश्यमान बहुब्रीह्यः––––––––––।

15. अधोलिखितेषु एकस्य साहित्यिकं परिचयं लिखत– 4

क) पुराणसाहित्यम्

ख) महाभारतम्

ग) रामायणम्

16. अधोलिखितेषु अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– 5

दक्षिणभारते केरलाप्रान्ते कालकीनाम्नि ग्रामे वेदवेदाड्.गपारड्.गतः शिवभक्तः, धर्मपरायणः, शिवगुरुनामा कश्चिद् ब्राह्मणोऽवसत्। अध्ययनसमये शिवगुरोः प्रतिभां चातुर्य्यं चावलोक्य बहवो विद्वांसस्तस्मै स्वकन्यां दातुमैच्छन् परं तदा तस्य गुरुणा तेषां प्रस्तावो निषिद्धः। अध्ययनान्ते मोघनाम्नः विप्रस्य अम्बानाम्नीं कन्यामुदवहदसौ। अतीते बहुकाले तयोर्दम्पत्योर्नाजायत काचिदपि सन्ततिः। तदा पुत्रकामनया ग्रामसमीपस्थं वर्धपर्वतं गत्वा सपत्नीकः शिवगुरुः गौरीपतेरराधनायां संसक्तोऽभूत्। त्रिवर्षानन्तरं तस्य भार्या पुत्ररत्नमसूत। कालान्तरे स एव पुत्रः शड्.कराचार्य इति नाम्ना प्रसिद्धः।

क) शड्.कराचार्यस्य पितुः नाम किम् ?

ख) शड्.कराचार्यस्य मातुः नाम किम् ?

ग) पुत्रकामनया शिवगुरुः कस्य अराधनां कृतवान् ?

घ) अम्बायाः पितुः नाम किम् ?

ड.) उपरिलिखितस्य गद्यांशस्य उचितं शीर्षकं लिखत।

17. अधोलिखितेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि लिखत– 8

अ) तस्य वचनानि श्रुत्वा स्वर्णा खिन्ना जाता। चिकित्सालयेषु रूग्णानां संख्या वर्धमाना अस्ति इत्यतः परिस्थितिः शोचनीयतां गता आसीत्। आन्दोलनमग्नानां वैद्यानाम् अश्रद्धाकारणतः रूग्णाः नितरां पीडिताः सन्ति इति पत्रिकासु वार्ताः प्रसारिताः। भोजनसमनन्तरमेव निन्द्रावशः जातः अजयः।

क) चिकित्सालयेषु केषां संख्या वर्धमाना अस्ति ?

ख) के आन्दोलनमग्नाः आसन् ?

ग) कः निद्रावशः जातः ?

घ) का खिन्ना जाता ?

ब) वृक्षाः पर्यावरणस्य मूलाधायकाः सन्ति। तेषां कर्तने एवं जल प्लावनं भवति। जलप्लावनेन बहवो ग्रामाः ध्वसन्ते। अकाले भूकम्पनं भवति। अतः अस्माभिः वृक्षारोपणं अवश्यं कर्त्तव्यम्ः पर्यावरणसन्धारणे तेषां महन्महत्त्वम् गङ्.गा–यमुनाप्रभृत्यः सरितो मातृवत्पुज्याः, ताः जीवनप्रदायिन्यः, कृषिसिंत्रवनक्षेत्रे तासां महती भूमिका, तासां संरक्षणेन जनानां जीवनं प्रमोदान्वितम्।

(क) जलप्लावनेन के ध्वसन्ते ?

(ख) अस्माभिः किं अवश्यं कर्त्तव्यम् ?

(ग) पर्यावरणस्य मूलाधायकाः के ?

(घ) भारतीयसंस्कृतौ के देवतावत् पूज्यन्ते ?

स) आसीत् पुरा कश्चित् सत्यव्रतो नाम महाराजः। सः सत्यमेव सर्वेषाम् आदर्शो जीवितलक्ष्यं च समाचरन् सर्वेषाम् आदर्शो व्यराजत्। एकदा ब्रह्ममुहुर्ते शयनात्दुत्थाय नदीस्नानार्थं प्रस्थितः। सिंहद्वारसमीपे कांचिद् सुन्दरीं सवेंग बहिर्गच्छन्तीं दृष्ट्वा पृष्टवानेवम् 'अयि। सुन्दरि! का त्वं ? राजभवनात् किमर्थं निर्गच्छसि ? सा प्राह–भो महाराज ! अहं धनलक्ष्मीः चिरात्तैव भवनं मया निवासाय अङ्.ीगकृतम् अधुना अंह भवनमिदं विहाय गन्तुमिच्छामि कृपया मेऽनुमति देहि। तस्याः वचनानि श्रुत्वा साधु! साधु! भवती यथामति गच्छतु पुर्नदर्शनाय इति सविनयं प्राह।

क) महाराजः ब्रह्ममुहुर्ते प्रथमतः कां अपश्यत् ?

ख) महाराजस्य नाम किं आसीत् ?

ग) महाराजः सुन्दरीं दृष्ट्वा किं पृष्टवान् ?

घ) एकदा प्रातरुत्थाय राजा कुत्र प्रस्थितः ?

प्र.18 अधोलिखितपद्यांशेषु पद्यांशद्वयस्य प्रश्नानां उत्ताराणि संस्कृतभाषायां लिखत– 8

अ) अन्नात् भवन्ति भूतानि, पर्जन्यादन्नसम्भवः ।

यज्ञात् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।

(क) कस्मात् अन्नसम्भवः ?

# आदर्श–उत्तरपत्रम्
# द्वादशी परीक्षा–2012–13
# संस्कृतम् (सामान्यम्)

(1) उचितविकल्पचयनम् 7

(क) स. द्विगुः

(ख) स. गुरोरोदशः

(ग) द व्यंजनसन्धिः

(घ) ब सुप्+अन्तः

(ड.) अ महान् चासौ आत्मा

(च) द प्रजापतिः

(छ) स नियमसंयमौ

(2) अव्ययानि 4

(क) अ रम्

(ख) अ ह्यः

(ग) ब अद्य

(घ) द उप

(3) धातुरूपाणि 3

(क) स एकवचनम्

(ख) द विधिलिङ्.लकारः

(ग) स ज्ञास्यति

(4) प्रत्ययाः 4

क द गतवानृ

ख ब मतुप्

ग ब णवुल

घ स शाला

(5) पर्यायविलोमचयनम् सूक्तिपूर्तिः 5

| | | |
|---|---|---|
| क | द | अरण्यम् |
| ख | अ | उपरि |
| ग | अ | कीर्तिः |
| घ | अ | मूर्खो |
| ङ. | ब | बलीयसी |

(6) शब्दरूपाणि 3

| | | |
|---|---|---|
| क | स | सप्तमीविभक्तिः |
| ख | ब | द्वितीयाविभक्तिः |
| ग | ब | बहुवचनम् |

(7) युग्ममेलनम् 4

| | क | ख |
|---|---|---|
| क) | बसन्ते लसन्तीह | सरला रसालाः |
| ख) | प्रकीर्णाः | बालुकाः |
| ग) | हंसस्य | दुग्धजलभेदविधौ |
| घ) | बालमृगाक्षि | अपर्णे |

(8) एकपदेन उत्तराणि 4

क) नियमसंयमौ

ख) चतुर्दश

ग) पार्वत्याः

घ) द्रुपदस्य

ङ.) मौनम्

निर्देशः– पाँच में चार प्रश्नों के उत्तर एक पद में सही लिखने पर कुल 4 अंक दिये जाये।

(9) एकवाक्येन उत्तराणि 2x3=6

क) स्पन्दनायाः वचनं श्रुत्वा अजयस्य कोपः आगतः।

ख) मूढधियः पराभवं ब्रजन्ति।

ग) जनसम्मर्दः देहलीनगरस्य रामलीलास्थले आसीत्।

घ) चांचल्यविहीनः संयमः एव सतीत्वम्।

ङ.) शकुन्तलायाः आभरणानि तात कण्वप्रभावात् आगतानि।

निर्देशः— किन्हीं तीन प्रश्नों के उत्तर एक वाक्य में लिखने पर 6 अंक दिये जाये।

(10) कारकशुद्धिकरणम् 5

क) सरस्वत्यै नमः।

ख) ग्रामं उभयतः वृक्षाः सन्ति।

ग) बालकः मित्रेण सह क्रीडति।

घ) अलं कोलाहलेन।

ङ.) छात्राः विद्यालयं प्रति गच्छन्ति।

च) अग्नये स्वाहा।

निर्देश — छह में से पाँच वाक्यों को शुद्ध करने पर 5 अंक दिये जायें।

उत्तर 11

क) पण्डितराजजगन्नाथः

संस्कृतस्य परवर्तिकाव्यशास्त्रिषु जगन्नाथः महत्वपूर्णः आचार्यः। एषः न केवलं काव्यशास्त्री अपितु उत्कृष्टः महाकविः वर्तते। अनेन विरचितानि अनेकानि काव्यानि प्रसिद्धानि सन्ति। तद्यथा गङ्.गालहरी, यमुनालहरी, भामिनीविलासः इत्यादीनि। काव्यशास्त्रमधिकृत्य असौ ''रसगङ्.गाधरं'' इति प्रसिद्धं ग्रन्थं रचितवान्। अस्य समयः ईशवीयसप्तदशशताब्दी अस्ति।

ख) महाकविभारविः

भारविः महाकविना अष्टादशसर्गात्मके कि रातार्जुनीयाख्यस्य महाकाव्यस्य रचना कृता। महाकाव्येऽस्मिन् शिवसमाराधनार्थं तपस्यतः किरातवेषेण साक्षाद् भगवता शिवेन सह युध्यतो अर्जुनस्य महाभारतीया कथा वर्णिता। श्रीशब्देन समारब्धस्य महाकाव्यस्यास्य प्रत्येक सर्गान्त— श्लोके लक्ष्मीशब्दोऽनुत्रप्रयुज्यते। महाकविः भारवेः विषये तदीयां विशिष्टां विशेषतां वर्णयन्ती'' ''भारवेरर्थगौरवम्'' इति सूक्तिः प्रसिद्धा।

ग) वेदव्यासः 4

महर्षि वेदव्यासेन वीरशान्तरसयुक्तं ''महाभारतम्'' इति ऐतिहासिकं काव्यं विरचितम्। एतस्य विकासक्रमानुसारेण ''जयम्''इति ''भारतम्'' इति ''महाभारतम्'' इति त्रीणि नामानि। अस्मिन् काव्ये

प्रायः लक्षश्लोकाः सन्ति। काव्यमिदं अष्टादशपर्वसु विभक्तम्। अत्र कौरवपाण्डवानां पारस्परिक–सङ्.घर्षस्य वर्णनं प्रोक्तम्। अस्मिन् महाकाव्ये धर्मार्थकाममोक्षादयः पुरूषार्थः, पुराण–इतिवृत्त–धर्मशास्त्र–अर्थशास्त्र–राजनीति–ज्ञानविज्ञान–कला–शिल्पादयः अनेकविषयाः समाविष्टाः।

निर्देशः– तीन में से कोई एक कवि परिचय लगभग 25–30 शब्दों में सही लिखने पर पूरे अंक दिये जाये।

12 (अनुच्छेलेखन पूर्ण) ½x8=4

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा क्रन्दनध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन बिद्धः एकः हंसः भूमौ पतितः आसीत्। एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्.के अधारयत्। अत्रान्तरे धावन् देवदत्तः तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः आवदत्त– सिद्धार्थ ! एषः हंसः मया बाणेन निपातितः। अतः महयं देहि।

निर्देशः– प्रत्येक सही रिक्त स्थान की पूर्ति करने पर ½ अंक प्रदान किये जाये कुल 4 अंक निर्धारित है)

13. सुभाषितानि 4

1) मानं हित्वा प्रियो भवति,
क्रोधं हित्वा न शोचति।
कामं हित्वाऽर्थवान् भवति,
लोभं हित्वा सुखी भवेत्।।

2) सुखं च दुःखं च भवाऽभवौ च,
लाभाऽलाभौ भ्रमणं जीवितं च।
पर्यायशः सर्वमेते भवन्ति,

तस्माद् धीरो ने हष्येन्न शोचेत्।।

निर्देशः– अपनी पाठ्यपुस्तक के सुभाषितानि पाठ के कोई दो शुद्ध सुभाषितश्लोक जो इस प्रश्नपत्र में न आये हो, लिखने पर पूर्ण अंक प्रदान किये जायें।

14. रिक्तस्थानपूर्तिः 4

क) ताटका त्वया व्यापादनीया।
ख) सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु।
ग) इन्द्रियाणां तृप्तिर्नास्ति कस्मात् कारणात्।
घ) प्रथमकवल एव मक्षिकापातः।
ड.) कादम्बरी गधबन्धा इव दृश्यमान बहुत्रीह्यः केदाराः।

निर्देश – प्रत्येक सही रिक्तस्थान की पूर्ति पर एक अंक दिया जाये। कुल 4 अंक निर्धारित है। पाँच में से चार वाक्यों में सही रिक्तस्थान की पूर्ति करने पूर्ण अंक प्रदान किये जाये।

(15) साहित्यिक परिचय् 4

(क) पुराणसाहित्यम्

पुराणानि अष्टादश स्मृतानि। तेषां रचयिता वेदव्यासः इति परम्परा विवेचनानुसार पुराणानि पंचधा विभक्तिानि।

1. सृष्टयुत्पतेः वर्णनम्।
2. सृष्टिप्रलयप्रक्रिया।
3. राज्ञां वंशावलिः।
4. मन्वतर–दिव्ययुगानां वर्णनम्।
5. राजवंशानुचरितम्।

एतानि अतिरिच्य अष्टादशोपपुराणानि अपि प्राप्तानि। मुख्यतया पुराणानि अष्टादश लभन्ते। तेषां नामानि सन्ति–नारदपुराणम्, कूर्मपुराणम्, शिवपुराणम्, गरूडपुराणम्, भागवतपुराणम्, इत्यादयः।

(ख) महाभारतम्

वीरशान्तरसयुक्त–महाभारतम् ऐतिहासिक काव्यत्वेन विख्यातम्। महर्षिणा कृष्णद्वैपायनेन महाभारतस्य रचना कृता इति परम्परा। अयमेव वेदव्यासः इति श्रुयते। एतस्य विकासक्रमानुसारेण 'जयम्' इति प्रथम, 'भारतम्' इति द्वितीयम् 'महाभारतम्' इति तृतीयम् इति त्रीणि नामानि सन्ति। अस्मिन् काव्ये लक्षाधिकाश्लोकाः सन्तिः। तेषां विद्यमान्त्वात् शतसहस्त्रीनाम्ना एतत् प्रसिद्धम्।

काव्यमिदम् अष्टादश–पर्वसु विभक्तं पर्वक्रमः एवमस्ति आदि–सभा–वन–विराड–उद्योग–भीष्म–द्रोण–कर्ण–शल्य सौप्तिक–स्त्री–शान्ति–अनुशास–आश्वमेधिक–आश्रमनासिक–कौशल–महाप्रास्थानिक–स्वर्गारोहणा इति। काव्यस्य रचना कालस्तावत ई.पू. 400 वर्षाणि इति विदुषां मतम्।

ग) रामायणम्–

महर्षि बाल्मीकि विरचितम् आदि काव्य रामायणम् लोक विश्रुतम्। रामायणे काव्ये बाल्मीकिना ब्राह्मणः प्रेरणया रामचरितं विरचितम्। रामायणी कथा सप्तकाण्ऽेषु चतुर्विशति सहस्त्रश्लोक युक्ता उपलभ्यते। रामायणे आदि कविना मर्यादा पुरूषोत्मस्य श्रीरामस्य आदर्श पुरूषत्वं मातृ पितृ देवातिथिप्रणा पुत्र भातृप्रेम व्यवहाराणामुचित वर्णनं कृतम्। रामायणस्य रचना कालः प्रायः ई.पू. 600 वर्ष पूर्वमिति विदुषां मतः।

निर्देशः— तीन में से किसी एक कृति का संक्षिप्त परिचय लगभग 25—30 शब्दों पर पूरे अंक प्रदान किये जाये।

16. अपठितगद्यांशम् 5

क) शड्.करामचार्यस्य पितुः नाम शिवगुरुः आसीत्।

ख) शड्.कराचार्यस्य मातुः नाम अम्बा आसीत् ।

ग) पुत्र कामनया शिवगुरुः गौरीपतेः अराधनां कृतवान्।

घ) अम्बायाः पितुः नाम मोघ आसीत्।

ड.) ''शड.कराचार्यः''

निर्देशः— प्रत्येक प्रश्न का उत्तर पूर्ण वाक्य में सही लिखने पर 1—1 अंक प्रदान किया जाये कुल 5 अंक निर्धारित हैं)

17.अ) गद्यम् 2x4=8

क) चिकित्सालयेषु रूग्णानां संख्या वर्धमाना अस्ति।
ख) वैद्याः आन्दोलनमग्नाः आसन्।
ग) अजयः निद्रावशः जातः।
घ) स्वर्णा खिन्ना जाता।

ब) क) जलप्लावनेन बहवो ग्रामाः ध्वंसन्ते।
ख) अस्माभिः वृक्षरोपणं कर्त्तव्यम्।
ग) वृक्षाः पर्यावरणस्य मूलाधायकाः सन्ति।
घ) प्रकृतेर्ये प्रमुखघटकास्ते सर्वे भारतीय संस्कृतौ देवतावत् पूज्याः।

स) क) महाराजः बह्ममुहुर्ते सुन्दरीं अपश्यत्।
ख) महाराजस्य नाम सत्यव्रतः आसीत्।
ग) महाराजः सुन्दरीं दृष्ट्वा पृष्टवानअयि ! सुन्दरि ! का त्वं ? राजभवनात् किमर्थं निर्गच्छति ?
घ) एकदा प्रातरूत्थाय राजा नदीस्थानार्थं प्रस्थितः।

निर्देशः— तीन में दो गद्यांशों के प्रश्नों के उत्तर देना है। प्रत्येक प्रश्न का सही उत्तर लिखने पर 1—1 अंक दिया जाये कुल 8 अंक निर्धारित है।

18 पद्यम् 2x4=8

अ)
क) पर्जन्यात् अन्नसम्भवः।
ख) यज्ञः कर्मसमुद्भवः।
ग) अन्नाद् भवन्ति भूतानि।
घ) यज्ञात् पर्जन्यः भवति

ब)

क) सरस्वती केतुना प्रचेतयति।

ख) महो अर्णः सरस्वती।

ग) सरस्वती धियो विश्वा विराजति।

घ) 'प्रचेतयति' इत्यस्मिन् पदे 'प्र' उपसर्गः अस्ति।

स)

क) यद्भर्तुरेव हिममिच्छति तत्कलत्रम्।

ख) यः प्रीणयेत् सुचरितैः पितरं स पुत्रः।

ग) यः आपदि सुखे च समक्रियं सः मित्रम्।

घ) पितरं– द्वितीयाविभक्तिः एकवचनम्।

निर्देशः– तीन में से कोई दो गद्यांश के प्रश्नों के उत्तर देना है। प्रत्येक सही उत्तर हेतु 1 अंक है कुल 8 अंक निर्धारित है।

(19) पत्रम्

स्थानान्तरणप्रमाणपत्रम्

सेवायाम्,

श्रीमन्तः प्राचार्यमहोदयाः

संस्कृत विद्यालयः दमोहनगरम्

विषयः– स्थानान्तरणप्रमाणप प्रदानार्थम् आवेदनम्।

महोदयः,

सादरं निवेदयामि यत् मम् पितुः स्थानान्तरणं ग्वालियरनगरं संजातम्। सकलः परिवारः अग्रिमे रविवासरे ग्वालियरनगरं गमिष्यति। मया अपि ग्वालियरनगरं एव अध्ययनं करणीयं भविष्यति

अतः विद्यालय स्थानान्तरण प्रमाण–पत्रं दत्वा भवन्तः मयि अनुग्रहं कुर्वन्तु इति प्रार्थये।

धन्यवादः।

दिनांड.क : 31–8–2012 भवताम आज्ञाकारी शिष्यः

अ, ब, स,

————————————————

स्वपितरं कृते पत्रम्

परीक्षाभवनम्

तिथि :– 31 / 8 / 2012

पूज्यपितृमहोदयः।

चरणवन्दना,

अत्र कुशलं तत्रास्तु। अद्याहं भवन्तं निवेदयामि यद् अस्माकं विद्यालये गतसप्ताहे रक्तदानशिविरम् आयोजितम्। अस्माकं कक्षायाः प्रमुखः अध्यापकः श्रीमान् दिवाकरः शिविरस्य प्रमुखः आयोजकः आसीत्। सः प्रथमं स्वरक्तम् प्रायच्छत्। तदनन्तरम् अस्माकं दशमकक्षायाः पंच छात्राः एतस्मिन शुभकार्ये अग्रसेराः अभवन्। तेषाम् उत्सहां दृष्ट्वा मम मनसि भावना सज्जाता तथा च मयाऽपि स्वरक्तम् प्रदत्तम्। आशासे यद् भवान् मम भावनां दृष्ट्वा प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि। चिन्तया अलम्।

भवतः पुत्र

अ, ब, स

निर्देशः– औपचारिक पत्र में सम्बोधन एवं विषय हेतु 1 अंक, विषयवस्तु (मध्यभाग) पर 2 अंक, अन्त में दिनांक एवं स्वपरिचय देने पर 1 अंक निर्धारित है। कुल 4 अंक दिये जायें।
अनौपचारिक पत्रों में सम्बोधन हेतु 1 अंक, मध्य के विस्तार (वर्ण्य विषय) पर 2 अंक एवं अन्त में स्वपरिचय हेतु 1 अंक निर्धारित है। सही लिखने पर पूरे 4 अंक प्रदान किये जायें।

————————————

उत्तर 20. निबन्ध 10

1. ग्राम्यजीवनम्

भारतं ग्रामाणां देशः। भारतीय जनंसख्यायाः बहुलांशः ग्रामेषु वसति। ग्रामेषु कृषकाः श्रमिकाश्च वसन्ति। तेषां मुख्यव्यवसायो कृषिः अस्ति। ते पशून् पालयन्ति। धेनोः वत्साः क्षेत्रकर्षणे उपयोगिनः भवन्ति। ग्रामवासिनः निर्धनाः अतः सन्तुलितं भोजनं न सुलभं तेभ्यः। ते निम्नजीवनस्तराः सन्ति। ग्रामेषु समुपयोगिनां गृहाणां अभावो विद्यते। कतिपयेषु ग्रामेषु शुद्ध जलस्यापि अभावः दृश्यते।

ग्रामे प्रकृतिसौन्दर्यमपि वर्तते। इतस्ततः वृक्षाः तिष्ठन्ति। वनशोभा अपि दर्शनीया अस्ति। ग्रामे नदी तडागौ अपि भवतः। प्रभाते सायंकाले च नदीपर्वतयोः शोभा हृदयं रंजयति।

कृषकाणां वध्वः क्षेत्रेषु कार्यं कुर्वन्ति। ग्रामेषु गोमयं इन्धनरूपेण उपयुज्यते। नार्यः गो दुग्धेन दधि नवनीतं घृतं च निर्मान्ति। ताः कूपात् जलम् आनयन्ति। ग्राम्यलोकगीतानि मनोहराणि सन्ति। ग्राम्यजीवने स्नेहसद्भावस्यापि प्राप्तिः विशेषेण दृश्यते। ते परस्परं सहाय्यं कुर्वन्ति। ग्रामे ग्रामसभा अपि भवन्ति। तत्र ते स्वविवादान् स्वयमेव निर्णयन्ति। अतएव कथितम्–

''अहो रम्यं ग्राम्यजीवनम्।''

(निर्देश–लगभग 100 शब्दों में किसी भी एक विषय में निबन्ध लिखने पर निबंध की भाषा शैली, विषयवस्तु, प्रस्तुतीकरण आदि को दृष्टिगत रखते हुये स्व–विवेकानुसार पूर्ण अंक दिये जायें।)